श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६७

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६७

*रासक्रीडायां भगवतस्तिरोभाववर्णनं*
*भगवदन्वेषणवर्णनं भगवदाविर्भाववर्णनं च*

स्फुरत्परानन्दरसात्मकेन त्वया समासादितभोगलीलाः।
असीममानन्दभरं प्रपन्ना महान्तमापुर्मदम्बुजाक्ष्यः॥ १ ॥

निलीयतेऽसौ मयि मय्यमायं रमापतिर्विश्वमनोभिरामः।
इति स्म सर्वाः कलिताभिमाना निरीक्ष्य गोविन्द तिरोहितोऽभूः॥ २ ॥

राधाभिधां तावदजातगर्वामतिप्रियां गोपवधूं मुरारे।
भवानुपादाय गतो विदूरं तया सह स्वैरविहारकारी॥ ३ ॥

तिरोहितेऽथ त्वयि जाततापाः समं समेताः कमलायताक्ष्यः।
वने वने त्वां परिमार्गयन्त्यो विषादमापुर्भगवन्नपारम्॥ ४ ॥

हा चूत हा चम्पक कर्णिकार हा मल्लिके मालति बालवल्ल्यः।
किं वीक्षितो नो हृदयैकचोरः इत्यादि तास्त्वत्प्रवणा विलेपुः॥ ५ ॥

निरीक्षितोऽयं सखि पङ्कजाक्षः पुरो ममेत्याकुलमालपन्ती।
त्वां भावनाचक्षुषि वीक्ष्य काचित् तापं सखीनां द्विगुणीचकार॥ ६ ॥

त्वदात्मिकास्ता यमुनातटान्ते तवानुचक्रुः किल चेष्टितानि।
विचित्य भूयोऽपि तथैव मानात् त्वया विमुक्तां ददृशुश्च राधाम्॥ ७ ॥

ततः समं ता विपिने समन्तात् तमोवतारावधि मार्गयन्त्यः।
पुनर्विमिश्रा यमुनातटान्ते भृशं विलेपुश्च जगुर्गुणांस्ते॥ ८ ॥

तथा व्यथासङ्कुलमानसानां व्रजाङ्गनानां करुणैकसिन्धो।
जगत्त्रयीमोहनमोहनात्मा त्वं प्रादुरासीरयि मन्दहासी॥ ९ ॥

सन्दिग्धसन्दर्शनमात्मकान्तं त्वां वीक्ष्य तन्व्यः सहसा तदानीम्।
किं किं न चक्रुः प्रणयातिभारात् स त्वं गदात् पालय मारुतेश॥ १० ॥

**********